प्राचीन

श्रीमद्भगवद्गीता

Keshav Aryal

* ॥ अर्जुन उवाच ॥ *

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥ १ ॥
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ २ ॥ (गी.१,

* ॥ श्रीभगवानुवाच ॥ *

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ४ ॥
देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ ५ ॥
नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ ६ ॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ ७ ॥
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ ८ ॥
स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ९ ॥

Keshav Aryal

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ १० ॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ११ ॥

सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ।
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ १२ ॥

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ १३

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ १४ ॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ १५ ॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ १६ ॥ (गी. २)

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ १७ ॥

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १८ ॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ १९ ॥ (गी. ३

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ २० ॥

Keshav Aryal

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥ २१ ॥
जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्वत: ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥
नमां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ॥ २२ ॥
कर्मण्यकर्म य: पश्येदकर्मणि च कर्म य: ।
स बुद्धिमान्मनुष्येषु स युक्त: कृत्स्नकर्मकृत् ॥ २३ ॥
यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सर: ।
सम: सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २४ ॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतय: संशितव्रता: ॥ २५ ॥
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ।
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ॥ २६ ॥ (गी·४)
सन्यास: कर्मयोगश्च नि:श्रेयसकरावुभौ ।
तयोस्तु कर्मसन्यासात्कर्मयोगो विशिष्यते ॥ २७ ॥
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ।
योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रिय: ॥
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ २८ ॥
(गी·५)

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मन: ॥ २९ ॥
योगी युञ्जीत सततमात्मानं रहसि स्थित: ।
एकाकी यतचित्तात्मा निराशीरपरिग्रह: ॥ ३० ॥

Keshav Aryal

समं कायशिरोग्रीवं धारयन्नचलं स्थिर: ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ॥ ३१॥
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दु:खं स योगी परमो मत: ॥ ३२॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३३॥ (गी.६)
भूमिरापोऽनलो वायु: खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अहं कृत्स्नस्य जगत: प्रभव: प्रलयस्तथा ॥ ३४॥
मत्त: परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ३५ ॥
रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययो: ।
प्रणव: सर्ववेदेषु शब्द: खे पौरुषं नृषु ॥ ३६॥
पुण्यो गन्ध: पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ३७॥
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ।
बलं बलवतां चाहं कामरागविवर्जितम् ॥ ३८ ॥
चतुर्विधा भजन्ते मां जना: सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥
वासुदेव: सर्वमिति स महात्मा सुदुर्लभ: ॥ ३९ ॥
जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदु: कृत्स्नमध्यात्मं कर्म चाखिलम् ॥४०॥
(गी.७)

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ४१ ॥
तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्य संशयम् ॥ ४२ ॥
सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ ४३ ॥ (गी. ८)
इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञान सहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ ४४ ॥
अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ Keshav Aryal
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥ ४५ ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ ४६ ॥
(गी. ९)
ज्योतिषां अहमंशुमान् नक्षत्राणामहं शशी ।
रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ॥ ४७ ॥
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्
अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ ४८ ॥
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
आयुधानामहं वज्रं सर्पाणामस्मि वासुकिः ॥ ४९ ॥
वरुणो यादसामहम् यमः संयमतामहम् ।
प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ॥ ५० ॥
(प्रह्लाद सर्व दैत्यानां)
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ ५१ ॥

अक्षराणामकारोऽस्मि राम! शस्त्रभृतामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ५२॥
वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यास! कवीनामुशना कविः ॥ ५३ ॥
औषधिनाम् (वनस्पतीनामश्वत्थ ओषधीनामहं यवः ।)
नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ॥ ५४॥ (गी.१०
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५५॥
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । Keshav Aryal
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ५६ ॥
अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ ५७ ॥
* ॥ अर्जुन उवाच ॥ *
यथा नदीनां बहवोऽम्बुवेगाः, समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ ५८ ॥
यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ ५९ ॥
आख्याहि मे को भवानुग्ररूपो लोकान् समाहर्तुमिह प्रवृत्तः ।
नमो नमस्तेऽस्तु सहस्रकृत्वः नमः पुरस्तादथ पृष्ठतस्ते ॥ ६०॥
* ॥ श्रीभगवानुवाच ॥ *
नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा ॥ ६१॥
मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ६२॥ (गी. ११)

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ६३ ॥

यथा प्रकाशयत्येक: कृत्स्नं लोकमिमं रवि: ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ६४ ॥
(गी. १३)

सत्वं सुखे सञ्जयति रज: कर्माणि भारत ।
ज्ञानमावृत्य तु तम: प्रमादे सञ्जयत्युत ॥ ६५ ॥

ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसा: ।
जघन्य गुणवृत्तिस्था अधो गच्छन्ति तामसा: ॥ ६६ ॥

समदु:खसुख: स्वस्थ: समलोष्टाश्मकाञ्चन: ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुति: ॥ ६७ ॥

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयो: ।
सर्वारम्भपरित्यागी गुणातीत: स उच्यते ॥ ६८ ॥

मां च यो ऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ ६९ ॥
(गी. १४)

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच: ॥ ७० ॥
(गी. १८)

॥ ॐ तत्सदिति प्राचीन श्रीमद्भगवद्गीता समाप्त ॥

केशवशरण उपाध्याय 'आर्यकेश'
www.aaryakesh.blogspot.in

Keshav Aryal